चतुर्दशः पाठः

देवी अहिल्या

अञ्जना — हरिः ॐ! भ्रातः! भवान् कुतः आगच्छति?



अङ्केशः — भगिनी, मालवप्रदेशतः आगच्छन् अस्मि।

अञ्जना — तव जन्मदेशः मध्यप्रदेशस्य मालवक्षेत्रे वर्तते किम्? तत्र को विशेषः?

अङ्केशः — आम्! विक्रमादित्य-भोजराजाभ्यां पोषिते मालवक्षेत्रे अहिल्यायाः प्रजावात्सल्यम् इति विषयम् अधिकृत्य लेखनप्रतियोगिता आसीत्।

अञ्जना — तर्हि, कथय मे अहिल्यावृत्तम्। श्रोतुम् इच्छामि।

अङ्केशः — सुशीलाबाई-माणकोजी इति अनयोः सुपुत्री आसीत्। अहिल्याबाई महाराष्ट्रस्य चौण्डीग्रामे पञ्चविंशत्युत्तरसप्तदश ख्रिस्ताब्दे (1725) मईमासस्य एकत्रिंशे (31) दिनाङ्के जन्म अलभत।

अञ्जना — नर्मदा-क्षिप्रा-शिवनाचम्बलनदीभिः सम्पन्नस्य मालवक्षेत्रस्य वधूः खण्डेरावस्य पत्नी खलु अहिल्याबाई?

अङ्केशः — आम्! सूबेदार-मल्हाररावस्य पुत्रवधूः मालवप्रजानां सर्वस्वम् आसीत्। अहिल्यायाः व्यक्तित्वं बहुमुखि-प्रतिभासम्पन्नं वर्तते स्म। एषा प्रजावत्सला, धर्मपरायणा, न्यायनिष्ठा महिला आसीत्।


राजवाड़ा

इन्दौरनगरे तस्याः राजवाड़ा क्षेत्रं सुन्दरं पवित्रं च अस्ति। अद्यापि राजवाड़ास्थलम् इन्दौरनगरस्य हृदयमिव प्रेक्षणीयं वर्तते। अत्र देशविदेशेभ्यः यात्रिकाः दर्शनार्थम् आगच्छन्ति।

अञ्जना — स्मरामि तस्याः धर्मनिष्ठाम्। स्वपुत्रस्य मालेरावस्य मरणानन्तरं नर्मदातीरम् इन्दौरसमीपस्थं महेश्वरस्थानं राजधानीं चकार।

अङ्केशः — पुनः पुनः स्मरतु। प्राचीनकालतः अवन्तिकानाम्नी प्रसिद्धा उज्जयिनी, माहिष्मतीनाम्ना प्रशस्तं महेश्वरञ्चेति स्थानद्वयं मालवक्षेत्रे अन्तर्भवति।

अञ्जना — राज्ञा महिष्मता निर्मिता माहिष्मती अधुना 'महेश्वरनगरमेव' अस्ति। अनूपदेशस्य राज्ञः सहस्रार्जुनस्य राजधानी अपि आसीत्।

अङ्केशः — अथ किम्! रामायण-महाभारतग्रन्थयोः बौद्ध-जैनधर्मग्रन्थेषु अपि महेश्वरस्य उल्लेखो वर्तते। कालिदासविरचिते रघुवंशे माहिष्मती-वर्णनमस्ति।



महेश्वरम्

आदिशङ्करमण्डनमिश्रयोः मध्ये शास्त्रार्थचर्चा महेश्वरस्थाने एव अभवत्, एतदेव पुण्यक्षेत्रम् अहिल्यायाः राजधानी च अभवत्।

अञ्जना — अहिल्याबाई धीरा शासनप्रवीणा च आसीत् इति पठितवती।

अङ्केशः — आम्! आम्, सत्यं खलु। तस्याः शासनव्यवस्था अर्थनीतिः रक्षानीतिः विद्याप्रीतिः च विशिष्टा इति ज्ञायते।

अञ्जना — अहो भाग्यं मालवक्षेत्रस्य। जयतु कीर्तिशेषा अहिल्याबाई।

अङ्केशः — जयतु, जयतु लोकमाता अहिल्याबाई।

उभौ — सर्वं सहा जितक्रोधाऽहिल्याबाईति कीर्तिता।
धर्मार्थकाममोक्षेषु निरता राजते सदा॥

शब्दार्थाः

प्रजावात्सल्यम् — प्रजा प्रेम
पञ्चविंशत्युत्तरसप्तदश — 1725
उत्तरे - आगे
एकत्रिंशः — 31

अलभत — पाया / प्राप्त किया
सर्वस्वम् — सब कुछ
बहुमुखिप्रतिभासम्पन्नम्— बहुत प्रकार की प्रतिभा से सम्पन्न
विशिष्टा — अद्वितीय, विशिष्ट

कीर्तिशेषा	— केवल यश के रूप में जीने वाली	धर्मार्थकाममोक्षेषु	— धर्म, अर्थ, काम और मोक्ष में
सहा	— धरती (सहन करने वाली)	चतुर्विधपुरुषार्था:	— चार प्रकार के पुरुषार्थ- धर्म, अर्थ, काम और मोक्ष
जितक्रोधा	— क्रोध को जीतने वाली		

अभ्यासः

1. एकपदेन उत्तरं लिखत —

क. अहिल्यायाः जन्मग्रामः कः?

ख. अहिल्यायाः व्यक्तित्वं कथं वर्तते?

ग. राजवाड़ा कुत्र अस्ति?

घ. माहिष्मती कस्य राजधानी आसीत्?

ङ. सुशीलाबाई-माणकोजी-इत्यनयोः पुत्री का आसीत्?

2. एकवाक्येन उत्तरं लिखत —

क. लेखनप्रतियोगिता कं विषयम् अधिकृत्य आसीत्?

ख. अहिल्याबाई कदा जन्म अलभत?

ग. अहिल्याबाई कीदृशी महिला आसीत्?

घ. महेश्वरस्थानस्य उल्लेखः कुत्र कुत्र वर्तते?

ङ. कीदृशी अहिल्याबाई सदा राजते?

3. रेखाङ्कितपदम् आधृत्य प्रदत्तैः शब्दैः प्रश्ननिर्माणं कुरुत—

क. अहं <u>मालवप्रदेशतः</u> आगच्छामि। (कुतः)

ख. अहिल्याबाई <u>खण्डेरावस्य</u> पत्नी आसीत्। (कस्य)

ग. <u>रघुवंशकाव्ये</u> माहिष्मतीवर्णनम् अस्ति। (कुत्र)

घ. अहिल्यायाः विद्याप्रीतिः <u>असामान्या</u> आसीत्। (कथम्)

ङ. <u>राज्ञा महिष्मता</u> निर्मिता माहिष्मती। (केन)

4. समुचितमेलनं कुरुत—

	(अ)		(ब)
क.	शङ्कर-मण्डनमिश्रयोः शास्त्रचर्चा	-	राजवाड़ा
ख.	सर्वं सहा	-	उज्जयिनी
ग.	अवन्तिका	-	महेश्वरस्थाने
घ.	रघुवंशम्	-	अहिल्याबाई
ङ.	इन्दौरनगरे	-	कालिदासरचितम्

5. उचितपदेन रिक्तस्थानं पूरयत—

क. भवान् कुतः ....। (आगच्छति / आगच्छसि)

ख. माहिष्मतीनाम्ना .... प्रसिद्धः। (महेश्वरः / उज्जयिनी)

ग. राजवाड़ास्थानं .... वर्तते। (प्रेक्षणीयं / उपेक्षणीयम्)

6. भिन्नशब्दं चिनुत —

क. कुतः, किम्, कुत्र, कथम्, मित्रम्।

ख. श्रोतुम्, गन्तुम्, नेतुम्, समागत्य, ज्ञातुम्।

ग. नर्मदा, क्षिप्रा, शिवना, चम्बल, हिमालयः।

घ. विंशतिः, अशीतिः, नवतिः, षष्ठिः, द्रोणः।

ङ. रामायणम्, महाभारतम्, पुराणम्, काव्यम्, कालिदासः।

योग्यताविस्तारः —

- मालवक्षेत्रस्य महेश्वरस्य यात्रां कुर्वन्तु।

चित्ते कृपा समरनिष्ठुरता च दृष्टा।